# শ্রীরাহু অষ্টোত্তরশতনামস্তোত্রম্

{॥ শ্রীরাহু অষ্টোত্তরশতনামস্তোত্রম্ ॥}

রাহু বীজ মন্ত্র - ॐ ভ্রাঁ ভ্রীং ভ্রৌং সঃ রাহবে নমঃ ॥

শৃণু নামানি রাহোশ্চ সৈংহিকেযো বিধুন্তুদঃ ।

সুরশত্রুস্তমশ্চৈব প্রাণী গার্গ্যাযণস্তথা ॥ ১॥

সুরাগুর্নীলজীমূতসংকাশশ্চ চতুর্ভুজঃ ।

খড্গখেটকধারী চ বরদাযকহস্তকঃ ॥ ২॥

শূলাযুধো মেঘবর্ণঃ কৃষ্ণধ্বজপতাকাবান্ ।

দক্ষিণাশামুখরথঃ তীক্ষ্ণদংষ্ট্রধরায চ ॥ ৩॥

শূর্পাকারাসনস্থশ্চ গোমেদাভরণপ্রিযঃ ।

মাষপ্রিযঃ কশ্যপর্ষিনন্দনো ভুজগেশ্বরঃ ॥ ৪॥

উল্কাপাতজনিঃ শূলী নিধিপঃ কৃষ্ণসর্পরাট্ ।

বিষজ্বলাবৃতাস্যোঽর্ধশরীরো জাদ্যসম্প্রদঃ ॥ ৫॥

রবীন্দুভীকরশ্ছাযাস্বরূপী কঠিনাংগকঃ ।

দ্বিষচ্চক্রচ্ছেদকোঽথ করালাস্যো ভযংকরঃ ॥ ৬॥

ক্রূরকর্মা তমোরূপঃ শ্যামাত্মা নীললোহিতঃ ।

কিরীটী নীলবসনঃ শনিসামন্তবর্ত্মগঃ ॥ ৭॥

চাণ্ডালবর্ণোঽথাশ্ব্যর্ক্ষভবো মেষভবস্তথা ।

শনিবৎফলদঃ শূরোঽপসব্যগতিরেব চ ॥ ৮॥

উপরাগকরস্সূর্যহিমাংষুচ্ছবিহারকঃ ।

নীলপুষ্পবিহারশ্চ গ্রহশ্রেষ্ঠোঽষ্টমগ্রহঃ ॥ ৯॥

কবন্ধমাত্রদেহশ্চ যাতুধানকুলোদ্ভবঃ ।

গোবিন্দবরপাত্রং চ দেবজাতিপ্রবিষ্টকঃ ॥ ১০॥

ক্রূরো ঘোরঃ শনের্মিত্রং শুক্রমিত্রমগোচরঃ ।

মানেগংগাস্নানদাতা স্বগৃহেপ্রবলাঢ্যকঃ ॥ ১১॥

সদ্গৃহেঽন্যবলধৃচ্চতুর্থে মাতৃনাশকঃ ।

চন্দ্রযুক্তেতু চণ্ডালজন্মসূচক এবতু ॥ ১২॥

জন্মসিংহে রাজ্যদাতা মহাকাযস্তথৈব চ ।

জন্মকর্তা বিধুরিপু মত্তকোজ্ঞানদশ্চ সঃ ॥ ১৩॥

জন্মকন্যারাজ্যদাতা জন্মহানিদ এব চ ।

নবমে পিতৃহন্তা চ পঞ্চমে শোকদাযকঃ ॥ ১৪॥

দ্যূনে কলত্রহন্ত্রে চ সপ্তমে কলহপ্রদঃ ।
ষষ্ঠে তু বিত্তদাতা চ চতুর্থে বৈরদাযকঃ ॥ ১৫॥

নবমে পাপদাতা চ দশমে শোকদাযকঃ ।
আদৌ যশঃ প্রদাতা চ অন্তে বৈরপ্রদাযকঃ ॥ ১৬॥

কালাত্মা গোচরাচারো ধনে চাস্য ককুৎপ্রদঃ ।
পঞ্চমে ধৃষণাশৃংগদঃ স্বর্ভানুর্বলী তথা ॥ ১৭॥

মহাসৌখ্যপ্রদাযী চ চন্দ্রবৈরী চ শাশ্বতঃ ।
সুরশত্রুঃ পাপগ্রহঃ শাম্ভবঃ পূজ্যকস্তথা ॥ ১৮॥

পাঠীনপূরণশ্চাথ পৈঠীনসকুলোদ্ভবঃ ।
দীর্ঘঃ কৃষ্ণোঽষিরসঃ বিষ্নুনেত্রারির্দেবদানবৌ ॥ ১৯॥

ভক্তরক্ষো রাহুমূর্তিঃ সর্বাভীষ্টফলপ্রদঃ ।
এতদ্রাহুগ্রহস্যোক্তং নাম্নামষ্টোত্তরং শতম্ ॥ ২০॥

শ্রদ্ধযা যো জপেন্নিত্যং মুচ্যতে সর্ব সংকটাত্ ।
সর্বসম্পৎকরস্তস্য রাহুরিষ্টপ্রদাযকঃ ॥ ২১॥

॥ ইতি রাহু অষ্টোত্তরশতনামস্তোত্রম্ সম্পূর্ণম্ ॥

Provided by Manda Krishna shrikanth mandaksk at gmail.com

Proofread by KSR Ramachandran ramachandran\—ksr at yahoo.ca

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Rahu Ashtottara Shatanama Stotram Lyrics in Bengali PDF
% File name : rAhu108nAmastotra.itx
% Category : aShTottarashatanAma
% Location : doc_z_misc_navagraha
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Manda Krishna Srikanth mandaksk at gmail.com
% Proofread by : KSR Ramachandran ramachandran_ksr at yahoo.ca
% Latest update : November 19, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website